# Shri Shanaishcharakrita Shri Nrisimhastuti

# શ્રીશનૈશ્ચરકૃતા શ્રીનૃસિંહસ્તુતિઃ

## Document Information

Text title : nrisimhastuti shanaishcharachitam

File name : nRRisimhastutishani.itx

Category : vishhnu, dashAvatAra, vishnu

Location : doc_vishhnu

Transliterated by : NA

Proofread by : NA

Latest update : May 14, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2020

*sanskritdocuments.org*

# શ્રીશનૈશ્ચરકૃતા શ્રીનૃસિંહસ્તુતિઃ

સુલભો ભક્તિયુક્તાનાં દુર્દર્શો દુષ્ટચેતસામ્ ।
અનન્યગતિકાનાં ચ પ્રભુર્ભક્તૈક વત્સલઃ ॥ ૧॥
શનૈશ્ચરસ્તત્ર નૃસિંહદેવસ્તુતિં ચકારામલ ચિત્તવૃત્તિઃ ।
પ્રણમ્ય સાષ્ટાઙ્ગમશેષલોક કિરીટ નીરાજિત પાદપદ્મમ્ ॥ ૨॥
શ્રીશનિરુવાચ -
યત્પાદપઙ્કજરજઃ પરમાદરેણ
સંસેવિતં સકલકલ્મષ રાશિનાશમ્ ।
કલ્યાણકારકમશેશનિજાનુગાનાં
સ ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૩॥
સર્વત્ર ચઞ્ચલતયા સ્થિતયા હિ લક્ષ્મ્યા
બ્રહ્માદિવન્દ્યપદયા સ્થિરયાન્ય સેવિ ।
પાદારવિન્દયુગલં પરમાદરેણ
સ ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૪॥
યદ્રૂપમાગમશિરઃ પ્રતિપાદ્યમાદ્યં
આધ્યાત્મિકાદિ પરિતાપહરં વિચિન્ત્યમ્ ।
યોગીશ્વરૈરપગતાખિલ દોષ સઙ્ઘૈઃ
સ ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૫॥
પ્રહ્લાદ ભક્તવચસા હરિરાવિરાસ
સ્તમ્ભે હિરણ્યકશિપું ય ઉદારભાવઃ ।
ઉર્વો નિધાય ઉદરં નખરૈર્દદાર
સ ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૬॥
યો નૈજભક્તમનલાં બુધિ ભૂધરોગ્ર-
શ ૃઙ્ગપ્રપાત વિષદન્તિ સરીસૃપેભ્યઃ ।
સર્વાત્મકઃ પરમકારુણિકો રરક્ષ
સ ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૭॥

યન્નિર્વિકાર પરરૂપ વિચિન્તનેન
યોગીશ્વરા વિષયવીત સમસ્તરાગાઃ ।
વિશ્રાન્તિમાપુર વિનાશવતીં પરાખ્યાં
સ ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૮॥
યદ્રૂપમુગ્ર પરિમર્દન ભાવશાલિ
સઞ્ચિન્તનેન સકલાઘ વિનાશકારી ।
ભૂતજ્વરગ્રહસમુદ્ભવભીતિનાશં
સ ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૯॥
યસ્યોત્તમં યશ ઉમાપતિ પદ્મજન્મ
શક્રાદિ દૈવત સભાસુ સમસ્તગીતમ્ ।
શક્ત્યૈવ સર્વશમલ પ્રશમૈક દક્ષં
સ ત્વં નૃસિંહ મયિ દેહિ કૃપાવલોકમ્ ॥ ૧૦॥
ઇત્થં શ્રુત્વા સ્તુતિં દેવઃ શનિના કલ્પિતાં હરિઃ ।
ઉવાચ બ્રહ્મવૃન્દસ્થં શનિં તં ભક્તવત્સલઃ ॥ ૧૧॥
શ્રીનૃસિંહ ઉવાચ -
પ્રસન્નોઽહં શને તુભ્યં વરં વરય શોભનમ્ ।
યં વાઞ્છસિ તમેવ ત્વં સર્વલોકહિતાવહમ્ ॥ ૧૨॥
શ્રીશનિરુવાચ -
નૃસિંહ ત્વં મયિ કૃપાં કુરુ દેવ દયાનિધે ।
મદ્વાસરસ્તવ પ્રીતિકરઃ સ્યાદ્દેવતાપતે ॥ ૧૩॥
મત્કૃતં ત્વત્પરં સ્તોત્રં શ‍ૃણ્વન્તિ ચ પઠન્તિ ચ ।
સર્વાન્કામાન્પૂરયેથાઃ તેષાં ત્વં લોકભાવન ॥ ૧૪॥
શ્રીનૃસિંહ ઉવાચ -
તથૈવાસ્તુ શનેઽહં વૈ રક્ષોભુવનસંસ્થિતઃ ।
ભક્ત કામાન્પૂરયિષ્યે ત્વં મમૈકં વચઃ શ‍ૃણુ ॥ ૧૫॥
ત્વત્કૃતં મત્પરં સ્તોત્રં યઃ પઠેચ્છૃણુયાચ્ચ યઃ ।
દ્વાદશાષ્ટમ જન્મસ્થાત્ ત્વદ્ભયં માસ્તુ તસ્ય વૈ ॥ ૧૬॥
શનિર્નરહરિં દેવં તથેતિ પ્રત્યુવાચ હ ।
તતઃ પરમસન્તુષ્ટાઃ જયેતિ મુનયોવદન્ ॥ ૧૭॥
શ્રીકૃષ્ણ ઉવાચ -
ઇદં શનૈશ્ચરસ્યાથ નૃસિંહદેવ
સંવાદમેતત્ સ્તવનં ચ માનવઃ ।

શ ૃણોતિ યઃ શ્રાવયતે ચ ભક્ત્યા
સર્વાણ્યભીષ્ટાનિ ચ વિન્દતે ધ્રુવમ્ ॥ ૧૮॥

ઇતિ શ્રીશનૈશ્ચરવિરચિતા શ્રીનૃસિંહસ્તુતિઃ સમાપ્તા ।

NA

*Shri Shanaishcharakrita Shri Nrisimhastuti*

pdf was typeset on June 12, 2020

Please send corrections to *sanskrit@cheerful.com*